**Nepal Sanskrit University** **[P.S.]**

# प्राक्शास्त्री
## २०७८

पूर्णाङ्काः - १००

विषयः :- अनिवार्यव्याकरणम् उत्तीर्णाङ्काः - ४०

पत्रम् :- प्रथमम् समयः - घण्टात्रयम्

---

### खण्ड-क

**समीचीनोत्तरस्य प्रकोष्ठे ☑ संकेतो देयः –** २०x१=२०

१. सिद्धान्तकौमुद्याः रचयिता कोऽस्ति ?
(क) वरदराजाचार्यः ☐ (ख) कौण्डभट्टः ☐
(ग) पाणिनिः ☐ (ङ) भट्टोजिदीक्षितः ☐

२. रामश्चिनोति अत्र कः सन्धिर्भवति ?
(क) यण् ☐ (ख) ष्टुत्वम् ☐ (ग) गुणः ☐ (घ) श्चुत्वम् ☐

३. रामशब्दस्य षष्ठीबहुवचनस्य रूपं किमस्ति ?
(क) रामाणाम् ☐ (ख) रामान् ☐ (ग) रामैः ☐ (घ) रामेषु ☐

४. गोशब्दस्य द्वितीयाबहुवचने किं रूपं भवति ?
(क) गौः ☐ (ख) गवे ☐ (ग) गाः ☐ (घ) गोभ्यः ☐

५. अस्मत् इति रूपं कस्यां विभक्तौ भवति ?
(क) भिस् ☐ (ख) भ्याम् ☐ (ग) भ्यस् ☐ (घ) आम् ☐

६. चिरम् शब्दस्य कोऽर्थः ?
(क) बहुकालम् ☐ (ख) मौने ☐ (ग) व्यर्थे ☐ (घ) ऋते ☐

७. लकाराः कति सन्ति ?
(क) नव ☐ (ख) दश ☐ (ग) एकादश ☐ (घ) द्वादश ☐

८. 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण किं करोति ?
(क) वृद्धिः ☐ (ख) गुणः ☐ (ग) अवादेशः ☐ (घ) अयादेशः ☐

९. हन्धातोः प्रथमपुरुषस्य बहुवचने किं रूपं भवति ?
(क) हन्ति ☐ (ख) हन्सि ☐ (ग) घ्नन्ति ☐ (घ) हथः ☐

१०. 'बोभूयते' इति कस्मिन् गणे रूपं भवति ?
(क) भ्वादिगणे ☐ (ख) तुदादिगणे ☐
(ग) चुरादिगणे ☐ (घ) यङन्तगणे ☐

११ पठ्यते क्रियापदं कस्मिन् वाचके प्रयुज्यते ?
(क) भाववाचके ☐ (ख) कर्मवाचके ☐
(ग) प्रेरणायाम् ☐ (घ) कर्तृवाचके ☐

क्रमशः

१२. कारकाणि कति सन्ति ?
(क) पञ्च ☐ (ख) षड् ☐ (ग) सप्त ☐ (घ) अष्ट ☐

१३. 'अधिशीङ्स्थासां कर्म' इतिसूत्रेण का संज्ञा भवति ?
(क) कर्तृसंज्ञा ☐ (ख) कर्मसंज्ञा ☐ (ग) करणसंज्ञा ☐ (घ) सम्प्रदानसंज्ञा ☐

१४. 'राजपुरुषः' अत्र कः समासो भवति ?
(क) तत्पुरुषः ☐ (ख) कर्मधारयः ☐ (ग) द्विगुः ☐ (घ) द्वन्द्वः ☐

१५. 'शिवकेशवौ' अत्र कः समासो भवति ?
(क) अव्ययीभावः ☐ (ख) बहुव्रीहिः ☐
(ग) द्वन्द्वः ☐ (घ) उपपदः ☐

१६. 'अनेकमन्यपदार्थे' इति सूत्रेण कः समासो भवति ?
(क) बहुव्रीहिः ☐ (ख) अव्ययीभावः ☐
(ग) तत्पुरुषः ☐ (घ) द्विगुः ☐

१७. कश्च तृच्प्रत्ययेन निर्मितः शब्दः ?
(क) भावकः ☐ (ख) कारकः ☐ (ग) कर्ता ☐ (घ) धावकः ☐

१८. 'वैनतेयः' केन प्रत्ययेन निर्मितः शब्दः ?
(क) अण् ☐ (ख) ठक् ☐ (ग) ढक् ☐ (घ) छण् ☐

१९. 'वयसि प्रथमे' इति सूत्रस्योदाहरणं किमस्ति ?
(क) कुमारी ☐ (ख) युवती ☐ (ग) गौरी ☐ (घ) नारी ☐

२०. 'उगितश्च' इति सूत्रेण किं करोति ?
(क) ङीप् ☐ (ख) ङीष् ☐ (ग) टाप् ☐ (घ) डाप् ☐

–: ० :–

**Nepal Sanskrit University** **[P.S.]**

# प्राक्शास्त्री

## २०७८

पूर्णाङ्काः - १००

विषयः :- अनिवार्यव्याकरणम् उत्तीर्णाङ्काः - ४०

पत्रम् :- प्रथमम् समयः - घण्टात्रयम्

(क) परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैश्शब्दैर्लेखनीयम् ।
(ख) दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान् द्योतयन्ति ॥

### खण्ड-ख

केचन चतुर्दश प्रश्नाः एव समाधेयाः – १४×४ = ५६

१. पतञ्जलेः परिचयो देयः ।

अथवा

ग, ज वर्णयोः स्थानं लिखित्वा 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' इति सूत्रस्योदाहरणमर्थञ्च लिखत ।

२. नदीशब्दस्य सर्वाणि रूपाणि लिखत ।

३. अधो लिखितानामव्ययशब्दानामर्थं लिखत–

(क) स्वर् (ख) हयस् (ग) नक्तम् (घ) ईषत्

४. भूधातोर्लङि सर्वाणि रूपाणि लिखत ।

५. पठ्धातोर्णिचि लटि सर्वाणि रूपाणि लिखत ।

अथवा

गम्धातोर्लटि सन्नन्तस्य सर्वाणि रूपाणि लिखत ।

६. प्रथमा-विभक्तिः कस्मिन्नर्थे भवति ?

७. 'कर्तुरीप्सिततमं कर्म' इति सुत्रस्योदाहरणमर्थञ्च लिखत ।

८. 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति सूत्रस्योदाहरणमर्थञ्च लिखत ।

९. अधोलिखितानां समस्तशब्दानां विग्रहं कुरुत ।

(क) अधिहरि (ख) नीलोत्पलम् (ग) यूपदारु (घ) धवरवदिरौ

१०. 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति सूत्रस्योदाहरणमर्थञ्च लिखत ।

११. 'तस्य भावस्त्वतलौ' इति सूत्रस्योदाहरणमर्थञ्च लिखत ।

१२. 'इन्द्रवरुण....' इति सूत्रं प्रपूर्य अस्योदाहरणमर्थञ्च लिखत ।

१३. घ, ध, ष वर्णानां प्रयत्नानुसारेण वर्गीकरणं कुरुत ।

१४. हरये, सर्वे, रमया, ज्ञानानि, लिहः, राज्ञः एषु चतुरः प्रयोगान् साधयत ।

अथवा

भविष्यामः वर्तेथे इमौ द्वौ प्रयोगौ साधयत ।

**क्रमशः**

### खण्ड-ग

त्रयः प्रश्नाः समाधेयाः – ३×८ = २४

१५. प्रेजते, रामश्शेते, वागीशः, हरिं वन्दे एषु प्रमुखसूत्रनिर्देशपूर्वकं सर्वान् प्रयोगान् साधयत ।

अथवा

राजन्शब्दस्य सर्वाणि रूपाणि लिखत ।

१६. श्रुधातोर्कर्तरि लटि सर्वाणि रूपाणि लिखत ।

अथवा

वृत्धातोर्कर्तरि लृटि सर्वाणि रूपाणि लिखत ।

१७. धात्रंशः, नायकः, श्रीशः, शिवो वन्द्य एषु प्रमुखसूत्रनिर्देशपूर्वकं सर्वान् प्रयोगान् साधयत ।

अथवा

युष्मद्शब्दस्य सर्वाणि रूपाणि लिखत ।

–: ० :–